## २५ पञ्चविंश दशकः - महासरस्वत्यवतारः शुम्भादिवधम्

अथामराः शत्रु विनाश तृप्ताः चिराय भक्त्या भवतीं भजन्तः ।
मन्दी भवद्भक्ति हृदः क्रमेण पुनश्च दैत्याभिभवं समीयुः ॥ २५-१॥

शुम्भो निशुम्भश्च सहोदरौ स्वैः प्रसादितात्पद्म भवात्तपोभिः ।
स्त्रीमात्रवध्यत्व मवाप्य देवान् जित्वा रणेऽध्यूषतु रैन्द्रलोकम् ॥ २५-२॥

भ्रष्टश्रियस्ते तु गुरूपदेशात् हिमाद्रि माप्ता नुनुवुः सुरास्त्वाम् ।
तेषां पुरश्चाद्रि सुताऽऽविरासीत् स्नातुं गता सा किल देवनद्याम् ॥ २५-३॥

तद्देहकोशा त्त्वमजा प्रजाता यतः प्रसिद्धा खलु कौशिकीति ।
महासरस्व त्यभिधां दधाना त्वं राजसी शक्ति रितीर्यसे च ॥ २५-४॥

हिमाद्रि शृङ्गेषु मनोहराङ्गी सिंहाधिरूढा मृदुगान लोला ।
श्रोत्राणि नेत्राण्यपि देहभाजां चकर्षिथाष्टादश बाहु युक्ता ॥ २५-५॥

विज्ञाय शुम्भः किल दूतवाक्यात् त्वां मोहनाङ्गीं दयितां चिकीर्षुः ।
त्वदन्तिके प्रेषयतिस्म दूतान् एकैकशः स्निग्धवचो विलासान् ॥ २५-६॥

त्वां प्राप्य ते कालिकया समेतां एकैकशः शुम्भगुणान् प्रभाष्य ।
पत्नी भवास्येति कृतोपदेशाः तत्प्रातिकुल्या त्कुपिता बभूवुः ॥ २५-७॥

शुम्भाज्ञया धूम्रविलोचनाख्यो रणोद्यतः कालिकया हतोऽभूत् ।
चण्डं च मुण्डं च निहत्य काली त्वत्फालजा तद्रुधिरं पपौ च ॥ २५-८॥

चामुण्डिकेति प्रथिता ततः सा त्वां रक्तबीजोऽध युयुत्सुराप ।
यद्रक्त बिन्दू द्भवरक्त बीज सङ्घै र्जगद्व्याप्त मभूदशेषम् ॥ २५-९॥

ब्रह्मेन्द्र पाश्यादिक देवशक्ति कोट्यो रणं चक्रुररराति सङ्घैः ।
तत्सङ्गरं वर्णयितुं न शक्तः सहस्रजिह्वोऽपि पुनः किमन्ये ॥ २५-१०॥

रणेऽतिघोरे विवृतानना सा काली स्वजिह्वां खलु चालयन्ती ।
त्वच्छस्त्र कृत्ताखिल रक्तबीज रक्तं पपौ गर्जन भीतदैत्या ॥ २५-११॥

त्वया निशुम्भस्य शिरो निकृत्तं शुम्भस्य तत्कालिकयाऽपि चान्ते ।
अन्येऽसुरास्त्वां शिरसा प्रणम्य पाताल मापु स्त्वदनुग्रहेण ॥ २५-१२॥

हतेषु देवा रिपुषु प्रणम्य त्वां तुष्टुवुः स्वर्गमगुः पुनश्च ।
ते पूर्वव द्यज्ञहवि र्हरन्तो भूमाववर्षन् जहृषुश्च मर्त्याः ॥ २५-१३॥

मातर्मदीये हृदि सन्ति दम्भ दर्पाभिमा नाद्यसुरा बलिष्ठाः ।
निहत्य तान् देह्यभयं सुखं च त्वमेव माता मम ते नमोऽस्तु ॥ २५-१४॥

** सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥ **